# AMRITA VIDYALAYAM
## AMRITA PRE BOARD EXAMINATION 2 - 2018 - '19

**Class : X** **Marks : 80**
**Time : 3 hrs**

# संस्कृतम्

निर्देशाः
अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।
प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।
प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

| | |
|---|---|
| खण्डः क - अपठित अवबोधनम् | - 10 अङ्काः |
| खण्डः ख - रचनात्मकं कार्यम् | - 15 अङ्काः |
| खण्डः ग - अनुप्रयुक्त व्याकरणम् | - 25 अङ्काः |
| खण्डः घ - पठित अवबोधनम् | - 30 अङ्काः |

## खण्डः क - अपठित अवबोधनम्

**1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

एकदा केचन शिष्याः भिक्षाटनं कुर्वन्ति स्म। तदैव एकः गजः महता वेगेन तस्मिन् मार्गे आगच्छत्। गजस्य उपरि उपविष्टः हस्तिपकः उच्चस्वरेण पुनः पुनः घोषयति स्म अपसरन्तु अपसरन्तु इति। सर्वे शिष्याः धावितवन्तः। यथा सर्वेषु वस्तुषु ईश्वरः अस्ति तथा गजे अपि इति विचिन्त्य एकः शिष्यः तत्रैव स्थितवान्। तावपि काले गजः तं स्वशुण्डया गृहीत्वा दूरे क्षिप्तवान्। शिष्याः मूर्छितं तं गुरुकुलम् अनयन्। लब्धसंज्ञं तं गुरुः अपृच्छत् - वत्स! त्वम् एवं किमर्थम् आचारः इति। शिष्यः अवदत् गुरुवर्य! भवद्भिः एव शिक्षितं यत् ईश्वरः सर्वेषु अस्ति। अतः अहं गजे अपि ईश्वरं मत्वा तत्र अतिष्ठम् इति। गुरुः उक्तवान् वत्स! यथा गजे तथा हस्तिपके अपि ईश्वरः इति कथं न चिन्तितम् इति।

**I. एकपदेन उत्तरयत।** **2**

क. गजः कं स्वशुण्डया गृहीत्वा प्राक्षिपत्?
ख. अपसरन्तु अपसरन्तु इति कः घोषयति स्म?
ग. ईश्वरः सर्वेषु अस्ति इति केन शिक्षितम्?
घ. शिष्यः कीदृशः जातः?

**II. पूर्णवाक्येन उत्तरयत।** **4**

क. यदा गजः आगतः तदा शिष्याः किं कुर्वन्ति स्म?
ख. शिष्यः गुरुं किम् अवदत्?

**III. भाषिककार्यम्।** **2**

क. वेगेन इति कस्य विशेषणपदम्?
(शिष्य:, महता, गज:)

ख. अपसरन्तु इति क्रियाया: कर्ता क:?
(शिष्य:, गज:, हस्तिपक:)

ग. उक्तवान् इति अत्र क: प्रत्यय:?
(क्तवतु, त्वा, मतुप्)

घ. भूय: इति पदस्य पर्याय: क?
(यथा, उपरि, पुन:)

**IV. अस्या: कथाया: उपयुक्तं शीर्षकं लिखत।** **2**

## खण्ड: ख – रचनात्मकं कार्यम्

**2. भवतां नाम लोकेश:। भवत: मित्रं गौरव: करनालास्थे विद्यालयस्य छात्रावासे वसति। तं प्रति लिखिते पत्रे मञ्जूषात: पदानि चित्वा पूरयत।** **5**

(क्षुधाया:, गङ्गाछात्रावास:, निर्देशा:, लोकेश:, स्वपित्रा, ज्ञातम्, गौरव, एकहोरापूर्वं, प्रसन्नमनसा, त्वदीयम्)

चेन्नैत:

तिथि: ----------

प्रिय मित्र (क) --------

सप्रेम नमस्ते।

भवत: पत्रात् मया (ख) ------- यत् त्वम् गतसप्ताहात् अस्वस्थ: असि। अहं (ग) ----------- सह तव विषये चर्चा कृतवान्। मम पितृमहोदय: प्राकृतिकचिकित्सक: अस्ति। तेन स्वास्थ्यरक्षणाय ये (घ) ------- दत्ता: तान् अहं लिखामि। ते नियमा: एवं सन्ति – प्रात: सूर्योदयात् (ङ) ------- शय्यात्याग: करणीय:। प्रतिदिनं भ्रमणय व्यायाम: च कर्त्तव्य:। यावत् (च) ------- अनुभूति: न भवेत्, भोजनं न कर्त्तव्यम्। भोजनेन सह जलं न पातव्यम्। भोजनं शनै: शनै: चर्वणपूर्वकम् (छ) --------- भक्षणीयम्। प्रतिदिनं पर्याप्तं जलं पातव्यम्।
अन्यत् सर्वं कुशलम्। समये समये स्वास्थ्यविषये त्वया अवश्यं सूचनीयम्।

(ज) --------- प्रिय मित्रम्

(झ) ----------

श्री गौरव:,

(ञ) ---------

नवोदय विद्यालय,

दिल्ली – 110054

**3. अधोलिखितं चित्रं दृष्ट्वा संस्कृतेन पञ्चवाक्यानि लिखत।** **10**

(कृषका:, वृक्षा:, खनित्रेण, क्षेत्रं, तपति, कुदालेन, गृहाणि, जना:)



अथवा

विद्यायाः महत्वम् इति विषयम् अधिकृत्य संस्कृतेन पञ्चवाक्यानि लिखत।
(विघा, सर्वधनप्रधानम्, गुप्तम्, विनयं, अधिकम्, विना, विद्वान्)

## खण्डः ग – अनुप्रयुक्त व्याकरणम्

**4. अधोलिखितेषु रेखाङ्कितेषु शब्देषु सन्धिं सन्धिविच्छेदं वा कुरुत।** 4

क. द्वावेव नरौ धन्यौ शूरः दाता च भूतले।

ख. कूपोदकं वटच्छाया च ग्रीष्मे शीतायते।

ग. अधुना एषः + हसति।

घ. जगदीश्वरः एव जगत्पालकः अस्ति।

**5. अधोलिखितेषु रेखाङ्कितेषु शब्देषु समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** 4

क. पत्रं च पुष्पं च देव्यै रोचते।
(पत्रपुष्पं, पत्रपुष्पे, पत्रपुष्पौ)

ख. रामस्य पश्चात् लक्ष्मणः चलति।
(पश्चात्राम, अनुरामम्, अनुरामः)

ग. तपः एव धनं यस्य सः इव सः आचरति।
(तपोधनः, तपोधनं तपधनः)

घ. यथा शक्तिं दानं कुर्यात्।
(यथाशक्तिः, शक्तिम् अनतिक्रम्य, शक्तेः पश्चात्)

**6. रेखाङ्कितपदेषु प्रकृति प्रत्ययौ संयोज्य विभज्य वा प्रदत्तविकल्पेभ्यः चित्वा लिखत।** 4

क. (बुद्धि + मतुप्) छात्राः पुरुषार्थे विश्वसन्ति।
(बुद्धिवान्, बुद्धिमान्, बुद्धिमन्तः बुद्धिवन्तः)

ख. सर्वैः सहपाठिभिः सह (मित्रता) आचरणीया।
(मित्र + तल्, मित्र + टाप्, मित्र + ता, मित्र + क्त)

ग. निरन्तरं (वृध् + शानच्) प्रदूषणेन मानवजातिः विविधैः रोगैः आक्रान्ता सन्ति।
(वर्धमानं, वर्धमानेन, वर्धमानः वर्धमाना)

घ. अस्माभिः स्नेहेन (वस् + तव्यत्)।
(वस्तव्यः, वस्तव्यम्, वस्तव्या, वसितव्यः)

**7. मञ्जूषायां प्रदत्तैः पदैः वाच्यपरिवर्तनं कृत्वा अधोलिखितं संवादं पुनः लिखत।** **3**

(छाया, ज्ञायते, अस्माभिः)

माता - मधुर! जानासि एषः विशालः कः वृक्षः अस्ति?
पुत्रः - आम्, मया (क) ------- एष तु वटवृक्षः।
माता - किम् वृक्षाः अस्मभ्यं छायां यच्छन्ति?
पुत्रः - आम् तैः अस्मभ्यं शीतला (ख) ------- दीयते।
माता - किं वयं वृक्षान् रक्षेम?
पुत्रः - आम्! (ग) -------- वृक्षाः रक्षितव्याः।

**8. कालबोधकशब्दैः अधोलिखित-दिनचर्यायां पूरयत।** **2**

क. (5.00) सा प्रातः ------- वादने उत्तिष्ठति।
ख. (6.30) ------- वादने ईश्वरवन्दनां करोति।
ग. (2.15) यदा अहं ---- वादने विद्यालयतः आगच्छामि सा मया सह भोजनं करोति।
घ. (2.45) -------- वादने विश्रामं करोति।

**9. अधोलिखिते संवादे उचित-अव्ययपदैः रिक्तस्थानानि पूरयत।** **4**

(उच्चैः, किमर्थम्, बहिः, अपि)

पिता - पुत्र! एष कोलाहलः (क) --------- भवति?
पुत्रः - (ख) --------- एका नटी स्वनृत्यकौशलं प्रदर्शयति।
पिता - किम् कश्चित् गायति, वादयति (ग) ----------?
पुत्रः - आम्, नटः (घ) --------- गायति, ढोलकं वादयति च।

**10. अशुद्धपदं संशोधयत।** **4**

क. एकः पथिकः ह्यः नगरं गच्छति।
ख. तत्र सः बहूनि भवनम् दृष्ट्वा चकितः जातः।
ग. तस्य मित्रः अपि तत्र तेन सह गतवान्।
घ. सः उद्यानं विशालम् अस्ति।

## खण्डः घ - पठित अवबोधनम्

**11. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

अस्ति कर्मपुरनाम्नि नगरे प्रच्छन्नभाग्य - नामधेयः कुमारः। बाल्ये वयसि विद्यापराङ्मुखः स केनचित् दुष्टबुद्धिनाम्ना चौरेण सह चौरकर्मणि निरतः सञ्जातः।

एकदा स दुष्टबुद्धिना सार्धं कस्यचित् श्रेष्ठिनः गेहे धनहरणार्थं ग्रामान्तरं प्रस्थितः।

**I. एकपदेन उत्तरयत।** 2

क. कर्मपुरनगरे कः अवसत्?

ख. कुमारः कस्मिन् कर्मणि निरतः सञ्जातः?

**II. पूर्णवाक्येन उत्तरयत।** 2

प्रच्छन्नभाग्यः दुष्टबुद्धिना सार्धं कुत्र किमर्थं च प्रस्थितः?

**III. भाषिककार्यम्।** 2

क. सञ्जातः इति क्रियापदस्य कर्तृपदं किम्?
(सः, दुष्टबुद्धिः, चौरः)

ख. सह इति अर्थे किं पदं प्रयुक्तम्?
(कस्यचित्, निरतः, सार्धम्)

ग. कस्यचित् श्रेष्ठिनः इत्यनयोः पदयोः विशेषणपदं किम्?
(कस्यचित्, गेहे, श्रेष्ठिनः)

घ. आयुषि इत्यस्य पदस्य कः पर्यायः अनुच्छेदे वर्तते?
(दुष्टबुद्धिः, वयसि, एकदा)

**12. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।

**I. एकपदेन उत्तरयत।** 2

क. पिता विद्याधनं कस्मै यच्छति?

ख. विद्यादानाय पिता किं करोति?

**II. पूर्णवाक्येन उत्तरयत।** 2

पितुः तपस्यां ज्ञात्वा पुत्रः किम् अनुभवति?

**III. भाषिककार्यम्।** 2

क. अस्य इति सर्वनामपदं कस्मै प्रयुक्तम्?
(पुत्राय, बाल्याय, पित्रे)

ख. विद्याधनं इति पदस्य विशेषणपदं किम्?
(विद्या, धनं, महत्)

ग. कथनम् इति अर्थे किं पदं प्रयुक्तम्?
(उक्तिः, कृतज्ञता, यच्छति)

घ. इत्युक्तिः अत्र सन्धिच्छेदं कथं भवति?
(इत्यु + क्तिः, इति + उक्तिः इत्य + उक्तिः)

**13. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत।**

मयूरः – (बकस्य वचनं श्रुत्वा प्रविश्य साट्टहासम्) सत्यं सत्यम्। अहमेव राष्ट्रपक्षी। को न जानाति तव ध्यानावस्थाम्। मौनं धृत्वा वराकान्

मीनान् छलेन अधिगृह्य, क्रूरतया भक्षयसि। धिक् त्वाम्! अवमानितं खलु सर्वं पक्षिकुलं त्वया।

काकः - रे सर्पभक्षक! नर्तनात् अन्यत् किम् अपरं जानासि?

मयूरः - श्रूयताम् श्रूयताम्! मम नृत्यं तु प्रकृतेः आराधना। पश्य! चारुवर्तुलचन्द्रिकाशोभितानां मम पिच्छानाम् अपूर्वं सौन्दर्यम्। मम केकारवं श्रुत्वा कोकिलः अपि लज्जते। मम शिरसि राजकुलमिव शिखां स्थापयता विधात्रा एव अहं पक्षिराजः कृतः।

**I. एकपदेन उत्तरयत।** **2**

क. कः स्वात्मानं राष्ट्रपक्षी कथयति?

ख. मयूरस्य केकारवं श्रुत्वा कः लज्जते?

**II. पूर्णवाक्येन उत्तरयत।** **2**

विधात्रा कथं मयूरः पक्षिराजः कृतः?

**III. भाषिककार्यम्।** **2**

क. स्थापयता विधात्रा अनयोः पदयोः विशेषणपदं किम्?
(शिखां, स्थापयता, विधात्रा)

ख. अत्र सर्पभक्षक इति संबोधनं कस्मै प्रयुक्तम्?
(कोकिलाय, काकाय, मयूराय)

ग. त्वया इति कर्तृपदस्य क्रियापदं किम्?
(कोकिलाय, काकाय, बकाय)

घ. पूजा इति पदस्य कः पर्यायः अत्र प्रयुक्तः?
(आराधना, स्थापयता, सौन्दर्यम्)

**14. रेखाङ्कितानि पदानि आधृत्य प्रश्ननिर्माणं कुरुत।** **4**

क. सूर्यं विना कालस्य गणना न सम्भवति।

ख. सभागारे मान्य पर्यटनाधिकारी प्रतीक्षते।

ग. सूर्योदये तमः नश्यति।

घ. गुरुणां तिरस्कारं संसारे विषम्।

**15. निम्नलिखितपद्यद्वयस्य अन्वयं पूरयित्वा पुनः लिखत।** **4**

(सञ्चयात्, आपद्गतेन, वृद्धिम्, विशेषतः, कोशः, प्रयोक्तव्यम्, अपूर्वः इदम्)

क. अपूर्व कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥

अन्वयः - भारति! तव अयं (क) -------- कः अपि (ख) ------- विद्यते।
व्ययतः (ग) ------- आयाति, (घ) --------- च क्षयम् आयाति ।

ख. परमापद्गतेनापि नैव तात त्वया रणे।
इदमस्त्रं प्रयोक्तव्यं मानुषेषु विशेषतः ॥

अन्वयः - तात! परम (क) ------- अपि त्वया रणे (ख) ------- अस्त्रं
(ग) -------- मानुषेषु न एव (घ) ---------।

**16. अधोखितवाक्येषु रेखाङ्कितपदानां कृते समुचित भावं चित्वा लिखत। 4**

क. अस्य याञ्चा वृथा मा अस्तु। (याचना, भिक्षा, यातना)

ख. क्रोधात् भवति संमोहः। (मूर्च्छा, विमूढता, उद्विग्नता)

ग. किं जीवितम्? अनवद्यम् । (वचनीयता, अपयशः, निष्कलङ्कता)

घ. पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्। (त्यज, मारय, प्रजा हि)